# श्रीमद्भगवद्गीता - चतुर्थोऽध्यायः

## ज्ञान योगः

**श्री भगवानुवाच**

इमं विवस्वते योगं प्रोक्तवा नह मव्ययम् ।
विवस्वान्मनवे प्राह मनु रिक्ष्वाकवेऽब्रवीत् ॥1॥

एवं परम्परा प्राप्तम् इमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥2॥

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥3॥

**अर्जुन उवाच**

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेत द्विजानीयां त्वमादौ प्रोक्तवा निति ॥4॥

**श्री भगवानुवाच**

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥5॥

अजोऽपि सन्नव्ययात्मा भूताना मीश्वरोऽपि सन् ।
प्रकृतिं स्वा मधिष्ठाय सम्भवाम्यात्म मायया ॥6॥

यदा यदा हि धर्मस्य ग्लानि र्भवति भारत ।
अभ्युत्थान मधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥7॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म संस्थाप नार्थाय सम्भवामि युगे युगे ॥8॥

जन्म कर्म च मे दिव्यम् एवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥9॥

वीत राग भय क्रोधाः मन्मया मामुपाश्रिताः ।
बहवो ज्ञान तपसा पूता मद्भाव मागताः ॥10॥

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानु वर्तन्ते मनुष्याः पार्थ सर्वशः ॥11॥

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धि र्भवति कर्मजा ॥12॥

चातुर्वर्ण्यं मया सृष्टं गुणकर्म विभागशः ।
तस्य कर्तार मपि मां विद्ध्य कर्तार मव्ययम् ॥13॥

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥14॥

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥15॥

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥16॥

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥17॥

कर्मण्यकर्म यः पश्येत् अकर्मणि च कर्म यः ।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्न कर्मकृत् ॥18॥

यस्य सर्वे समारम्भाः काम सङ्कल्प वर्जिताः ।
ज्ञानाग्नि दग्ध कर्माणं तमाहुः पण्डितं बुधाः ॥19॥

त्यक्त्वा कर्म फलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभि प्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥20॥

निराशीर्यत चित्तात्मा त्यक्त सर्व परिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥21॥

यदृच्छा लाभ सन्तुष्टः द्वन्द्वातीतो विमत्सरः ।
समः सिद्धाव सिद्धौ च कृत्वापि न निबध्यते ॥22॥

गत सङ्गस्य मुक्तस्य ज्ञानावस्थित चेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥23॥

ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म समाधिना ॥24॥

दैवमे वापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोप जुह्वति ॥25॥

श्रोत्रादी नीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन् विषयानन्ये इन्द्रियाग्निषु जुह्वति ॥26॥

सर्वाणीन्द्रिय कर्माणि प्राण कर्माणि चापरे ।
आत्म संयम योगाग्नौ जुह्वति ज्ञान दीपिते ॥27॥

द्रव्य यज्ञास् तपोयज्ञाः योगयज्ञास् तथाऽपरे ।
स्वाध्याय ज्ञान यज्ञाश्च यतयः संशित व्रताः ॥28॥

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापान गती रुद्ध्वा प्राणायाम परायणाः ॥29॥

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदः यज्ञ क्षपित कल्मषाः ॥30॥

यज्ञशिष्टा मृतभुजः यान्ति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्य यज्ञस्य कुतोऽन्यः कुरुसत्तम ॥31॥

एवं बहुविधा यज्ञाः वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वान् एवं ज्ञात्वा विमोक्ष्यसे ॥32॥

श्रेयान् द्रव्य मयाद्यज्ञात् ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥33॥

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस् तत्त्वदर्शिनः ॥34॥

यज्ज्ञात्वा न पुनर्मोहम् एवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥35॥

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥36॥

यथैधांसि समिद्धोऽग्निः भस्मसात् कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ॥37॥

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योग संसिद्धः कालेनात्मनि विन्दति ॥38॥

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिम् अचिरेणाधि गच्छति ॥39॥

अज्ञश्चा श्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परः न सुखं संशयात्मनः ॥40॥

योग सन्न्यस्त कर्माणं ज्ञान सञ्छिन्न संशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥41॥

तस्मा दज्ञान सम्भूतं हृत्स्थं ज्ञानासि नात्मनः ।
छित्त्वैनं संशयं योगम् आतिष्ठोत्तिष्ठ भारत ॥42॥

॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन संवादे ज्ञानयोगो नाम चतुर्थोऽध्यायः ॥